रजतजयन्तीग्रन्थमाला-४

# महाकवि-विद्यापतिः



आचार्य डा० जयमन्तमिश्रः

राष्ट्रिय-संस्कृत-संस्थानम्

# विद्यापति-पञ्चकम्

अभिनवजयदेव! श्रीलविद्यापते! त्वम्
सुजन-सुकवि-कण्ठे हार एवासि नूनम्।
सरस-मधुर-गाता कोकिलस्त्वं कवीन्द्रः
बुधसदसि धुरीणः कस्य नासीर्नमस्यः॥ १॥

हरि-हर-गणपति-दुर्गाऽऽदित्यान् देवान् समर्च्य संभक्त्या।
निरताराधन-रक्तस्त्वमेव शक्तोऽभूस्तदीय एकत्वे॥ २॥

विश्ववन्द्योऽसि धन्योऽसि कोऽन्योऽस्ति ते
तुल्यतां यातु काव्ये कला-कौशले।
राजनीतौ, प्रजारञ्जने, भञ्जने-
शत्रुवर्गस्य, तन्मान-सम्मर्द्दने॥ ३॥

कविवर! तवगुण-गणनां कर्तुं कस्यास्ति स्वौजसां राशिः?
सिकता-कण-गणनायां कस्य भवति कृति-साध्यताज्ञानम्? ॥४॥

गुणात्मके वस्तूनि मौनितायां-
वाग्जन्मवैफल्यमसह्यशल्यम्।
तमेव शल्यं शमितुं विधीयते
मया तरितुं जलधिं प्रयासः॥ ५॥

सुयशोधवलित-विश्वम्
कृति-कृत-संसृति-मानवोपकारम्।
तं प्रणमति जयमन्तः
विद्यावन्तं गुणाम्बुधिं सन्तम्॥

# विषयानुक्रमणिका


**प्राक्कथनम्** iii

**अवतरणिका** v

**विद्यापतिपञ्चकम्** vi

**पूर्वभागः- जीवनवृत्तात्मकः** १-४७

१. विद्यापतेर्जन्म १

२. नान्यदेवस्य मिथिलायामागमनम् २

३. नान्यदेवस्य विजयसेनात् पराजयः ३

४. नान्यदेववंशजा राजानः ३

५. गाङ्गदेवः ४

६. नरसिंहदेवः ४

७. रामसिंहदेवः ८

८. शक्रसिंहः १०

९. वीरेश्वरः १२

१०. हरिसिंहदेवः १६

११. हरिसिंहदेवस्य नेपाल-विजययात्रा २०

१२. पञ्जीप्रबन्धः २३

१३. चण्डेश्वरः २३

१४. स्पर्शमणि-प्रभावः २४

१५. हरिसिंहदेवस्य नेपालविजयः २६

१६. भवसिंहः ३१

१७. देवसिंहः ३१

१८. शिवसिंहः ३१

१९. विद्यापतिः ३१

२०. विसपीग्रामशासनपट्टम् ३६

२१. लक्ष्मणादेवी ३८

२२. विश्वासदेवी ४१
२३. नरसिंहदेवः ४१
२४. धीरसिंहः ४१
२५. भैरवसिंहः ४१
२६. विद्यापतेर्जीवनम् ४२
२७. विद्यापतेर्गङ्गालाभः ४७

**उत्तरभागः- कृतिपरिचयात्मकः** ४८-११५

१. कीर्तिलता ४८
२. भूपरिक्रमणम् ५०
३. पुरुषपरीक्षा ५३
४. मणिमञ्जरी ५९
५. गोरक्षविजयनाटकम् ६३
६. कीर्तिपताका ६७
७. लिखनावली ७२
८. शैवसर्वस्वसारः ७७
९. शैवसर्वस्वसारप्रमाणभूतपुराणसंग्रहः ८३
१०. गङ्गावाक्यावली ८३
११. विभागसारः ८५
१२. दानवाक्यावली ८८
१३. दुर्गाभक्तितरङ्गिणी ९३
१४. व्याडीभक्तितरङ्गिणी १०१
१५. गयापत्तलकम् १०८
१६. वर्षकृत्यम् ११२
१७. प्रश्नोत्तरमालिका ११३
१८. ज्योतिस्सारसमुच्चयः ११४
१९. चिकित्साञ्जनम् ११५

**परिशीलित—सन्दर्भ-ग्रन्थाः** ११६-११९

# पूर्वभागः

## जीवनवृत्तात्मकः

जगज्जननी-जानकी-जनन-परिपूतायाम् आत्मविद्या-विशारद-जनक-याज्ञ-वल्क्य-गौतम-कणाद-शतानन्दादि-महर्षि-ज्ञान-स्थलीभूतायां कुमारिल-मण्डन-वाचस्पत्युदयन-गङ्गेश-वर्धमान-हलायुध-ज्योतिरीश्वर-चण्डेश्वर-धवलायाम् मीमांसा-न्याय-वेदाध्ययन-पटुतरैः पण्डितैर्मण्डितायां, सरस्वती-लास्य-विलास-रङ्गभूमि-स्वरूपायाम् भूसुर-भूपति-पालितायाम् मिथिलायाम् मधुबनी-मण्डलान्त-र्गत-वेनीपट्टीसमीपस्थ-विसपीग्राम-वास्तव्यः काश्यपगोत्रीय-बिसइवार-विसपीमूलकः परमसौभाग्यशालीगणपतिठक्कुर; ख्रीष्टीयचतुर्दशशतक-मध्यभागे व्योम-बाण-वह्नि-विधुमित (१३५०) वत्सरे स्वधर्मपत्न्यां गङ्गादेव्याम् अन्वर्थना-मानं विद्यापतिं यशस्करं तनयं लेभे ।

अस्मिन्नवदातवंशे समुत्पन्ना विद्यापतेः पूर्वजाः कर्णाटवंशीयराजानां राज्य-काले न केवलं राजाश्रिता आसन्, अपि तु विशिष्टेषु प्रशासनाधिकारि-पदेषु नियुक्ता राज्यशासनभारं वहन्तः राज्यं सुदृढीकर्तुं प्रजाश्च समाराधयितुमनारतं प्रयतमाना आसन् । मिथिलायाः प्राचीनेतिहास-साक्ष्येण विविधोपलब्धाभिलेख-प्रामाण्येन च निश्चीयते यन्मिथिलायाम् १०९७ ख्रीष्टाब्दात् १३२४/१३२६ ख्रीष्टाब्दं यावत् कर्णाटवंशीयराजानां शासनमासीत् ।

कर्णाटदेशीयः परमारवंशीयः क्षत्रियो नान्यदेवः पारिवारिककलहेन अशान्तः कतिपयैरनुयायिवर्गैः सह कर्णाटात्प्रचलितः वङ्गदेशीयं राजानं विजयसेनं समा-श्रित्य तदीयं किमपि विशिष्टम् अधिकारिपदं समवाप्य पश्चात् मिथिलामागत्य स्वयमेव तत्र राज्यं कर्तुमना वास्तुं व्यधात्, अथवा विजययात्राप्रसङ्गे वङ्गराजेन



# राष्ट्रिय-संस्कृत-संस्थानम्

ए-४०, विशाल एन्क्लेव, राजा गार्डन,
नई दिल्ली-११००२७ (भारत)